# AASHIRWADAM & GHANAM & NAVAGRUHA KAVACHAMS





# INDEX



| SR NO | DETAILS | PAGE |
|---|---|---|
| 1 | Aashirwada Mantra | 4 |
| 2 | Supplement | 6 |
| 3 | Shri Rudra Deeparadhana Mantra -1 | 10 |
| 4 | Shri Rudra Deeparadhana Mantra -2 | 12 |
| 5 | Shri Rudra Deeparadhana Mantra -3 | 14 |
| 6 | Shri Rudra Deeparadhana Mantra -4 | 16 |
| 7 | Deepa Dhupa Upachara mantra | 18 |
| 8 | Ganam - Mayi Medham | 22 |
| 9 | Ganam - Maéta Anarvanam | 23 |
| 10 | Ganam - Saa Prajaam Pashoon | 24 |
| 11 | Ganam - Yasya Putro | 25 |
| 12 | Ganam - Ye Deva Divibhaga | 26 |
| 13 | Ganam - Prajaamayur Dhanam | 28 |
| 14 | Ganam - Sarveebhyo Vai Kameebhya | 29 |
| 15 | Ganam - Pushtim Dhatta | 31 |
| 16 | Ganam - Taa Vishno Pahi | 32 |
| 17 | Ganam - Jeevatushchame | 33 |
| 18 | Navagéha Mantra | 37 |
| 19 | Navagéha Pedda Hara Stotram | 38 |
| 20 | Shri Soorya Stotram | 39 |
| 21 | Sooryashtakam | 40 |
| 22 | Soorya Kavacham | 42 |
| 23 | Soorya Kavacha Stotram | 47 |
| 24 | Ankaraka Stotram | 48 |
| 25 | Chandra Kavacham | 49 |
| 26 | Mangala Kavacham | 50 |
| 27 | Hénamochaka Mangala Stotram | 51 |
| 28 | Bhuda Kavacham | 52 |

| | | |
|---|---|---|
| 29 | Brahaspati Stotram | 53 |
| 30 | Brahaspati Kavacham | 54 |
| 31 | Shukra Kavacham | 55 |
| 32 | Shri Shanaischara Mala Mantra | 56 |
| 33 | Shani Vajra Panchara Kavacham | 58 |
| 34 | Shanaischara Stotram | 59 |
| 35 | Rahu Kavacham | 61 |
| 36 | Rahu Stotram | 62 |
| 37 | Ketu Kavacham | 63 |


**********

*Compiled By Shri N K Venkitaraman.*

**********


[ For a free copy of printable PDF file
write to nkv.nvr@gmail.com ]


(All texts have been carefully proof-read. Every effort has been made to ensure that no errors exist in these texts. If you find an error, please report it so that it can be corrected.)

# ॥ AASHIRVADA MANTRAM ॥

शतमानं भवति शतायुः पुरुष श्शते-न्द्रिय
आयुष्ये-वेन्द्रिये प्रति-तिष्ठति ॥

श्री वर्चस्य मायुष्य मारोग्य माविधात् शोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्र लाभं शत-संवत्सरं दीर्घमायुः ॥

न तत्र सूर्यो-भाति न चन्द्र-तारकं नेमा विद्युता-भान्ति कुतोय-मग्निः ।
तमेव-भान्त मनु-भाति सर्वं तस्य-भासा सर्व-मिदं-विभाति ॥

पर्याप्त्या अनन्त-राया-य सर्व स्थोमो-ति रात्र उत्तम महद्भवति
सर्व-स्याप्त्यै सर्व-स्य-जित्यै सर्व-मेव तेनाप्नोति सर्वं-जयति ॥

ऋद्ध्या-स्म हव्यै-र्नमसो प-सद्य । मित्रं देवं मित्र धेयं -नो-अस्तु ।
अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः ।
नवो नवो भवति जायमानो ऽह्नांके तु-रु-ष सामे त्यग्रे ।
भागं देवेभ्यो विदधा त्या-यन् प्र-चन्द्रमा स्तिरति दीर्घमायुः ॥

सुमंगली-रियं वधू-रिमाꣳ समे-त पश्यत ।
सौभाग्य-मस्यै दत्वा याथा-स्तं विपरेतन ।
इमां त्व-मिन्द्र मीड्-व स्सु-पुत्राꣳ सुभगां कुरु ।
दशा-स्यां पुत्रा-ना-धेहि पति-मेका-दशं कृधि ॥

यशस्कारं बलावन्तं प्रभुत्वं तमेव राजाधिपति र्बभूव ।
संकी-र्णना गाश्व पति-र्न-राणां सुमंगल्यं सततं दीर्घमायुः ॥

पुरस्ता-द्दश-होतार मुदं च मुप दधाति याव-त्पदं ।
हृदयं यजुषी पत्न्यौ च । दक्षिण-तः प्राचं चतुर् होतारं ।
पश्चा दुद-ञ्चं पञ्च होतारं । उत्तरतः प्रा-ञ्चꣳ षड्-डोतारं ।
उपरिष्ठात् प्रा-ञ्चꣳ सप्त होतारं । हृदयं यजूꣳषि पत्न्यै श्च ।
यथा-वकाशं ग्रहान् । यथा-वकाशं प्रति ग्रहान् ल्लोकं पृणा-श्च ।
सर्वा-हास्यै-ता देवताः प्रीता अभीष्टा भवन्ति ॥

संज्ञानं विज्ञानं प्रज्ञानं जान-दभि जानत् ।
संकल्पमानं प्रकल्पमान मुपकल्पमान मुप क्लुप्तं क्लुप्तम् ।
श्रेयो वसीय आय थ्संभूतं भूतम् ॥ चित्रः केतुः प्रभानाभान् थ्संभान् ।
ज्योतिष्मा॒ँ स्तेजस्वा-ना तप॒ँ स्तप-न्नभि तपन्न् ।
रोचनो रोचमानः शोभनः शोभमानः कल्याणः ॥

आ-ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायता-माऽस्मिन् राष्ट्रे राजन्य
इषव्य-श्शूरो महा-रथो जायतां दोग् ध्री धेनु-र्वोडा ऽनड्-वा-नाशु
स्सप्तिः पुर-न्धि-र्योषा जिष्णू रथेष्ठा स्सभे-यो युवाऽस्य
यजमानस्य वीरो जायता-न्नि कामेनि कामेनः पर्जन्यो वर्षतु
फलिन्यो न ओषधयः पच्च्य-न्तां योगक्षेमो-नः कल्पतां ॥

बहु-ग्वै बह्व-श्वायै बह्व-जाविकायै ।
बहु-व्री-हि-य-वायै बहु-माष-तिलायै । बहु-हिरण्यायै बहु-हस्तिकायै ।
बहु-दास-पूरुषायै रयि-मत्यै पुष्टि-मत्यै ।
बहु-रायस्पोषायै राजास्तु ॥

# ॥ SUPPLEMENT ॥

नमः प्राच्यै दिशेयाश्च देवता एतस्यां प्रति-वसन्त्ये ताभ्यश्च नमो

नमो दक्षिणायै दिशेयाश्च देवता एतस्यां प्रति-वसन्त्ये ताभ्यश्च नमो

नमः प्रतीच्यै दिशेयाश्च देवता एतस्यां प्रति-वसन्त्ये ताभ्यश्च नमो

नम उदीच्यै दिशेयाश्च देवता एतस्यां प्रति -वसन्त्ये ताभ्यश्च नमो

नम ऊर्ध्वायै दिशेयाश्च देवता एतस्यां प्रति-वसन्त्ये ताभ्यश्च नमो

नमोऽधरायै दिशेयाश्च देवता एतस्यां प्रति -वसन्त्ये ताभ्यश्च नमो

नमोऽवान्तरायै दिशेयाश्च देवता एतस्यां प्रति-वसन्त्ये ताभ्यश्च नमो

नमो गंगा यमुनयो र्मध्ये ये वसन्ति

ते मे प्रसन्ना-त्मा-न श्चिरं जीवितं वर्ध-यन्ति

नमो गंगा यमुनयो र्मुनिभ्यश्च नमो

नमो गंगा यमुनयो र्मुनिभ्यश्च नमः ॥

ये अर्वाङ् उतवा पुराणे वेदं विद्वाꣳ सम-भितो वदन्त्या-दित्य
मे वते परि-वदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हꣳ
स मिति यावती-र्वै देवता-स्ता स्सर्वा वेद विदि ब्राह्मणे
वसन्ति तस्मात् ब्राह्मणे-भ्यो वेद विद्-भ्यो दिवे दिवे
नम स्कुर्या-न्ना श्ली-लङ कीर्तये देता एव देवताः प्रीणाति ॥

नमो महद्-भ्यो नमो अर्भके-भ्यो नमो युवद्-भ्यो नमो आशिने-भ्याः ।
यजा-म देवान् यदीशा-क्न वाम-माज्या-या -सः शं समा-वृक्षि देवाः ॥

सद स-स्पति मद्-भुतं प्रिय-मिन्द्रस्य काम्यं ।
सनिं मेधा-मया सिषं ॥

सप्रथ सभां मे गोपाय । ये च सभ्याः सभा-सदः ।
तानिन्द्र-यावतः कुरु । सर्व-मायुरु-पास-ताम् ।
अहे बुध्निय-मन्त्रं मे गोपाय । य-मृषय स्त्रै-विदा विदुः ।
ऋचः सामानि यजूꣳषि । सा हि श्री-रमृता सताम् ॥

पञ्च हूतो ह वै नाभमैषः । तं वा एतं पञ्च हूतꣳ सन्तम् ।
पञ्च होतेत्या चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्र श्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥

देवीं वाच-म जनयन्त देवाः । तां विश्व-रूपाःपशवो वदन्ति ।
सानो मन्त्रेष मूर्जं दुहाना । धेनु-र्वा-गस्मा-नुप सुष्टु-तै-तु ।
सु-मुहूर्तोऽस्त्व-त्यनु-गृह्णन्तु । सु-मुहूर्तोऽस्तु ।
सु-प्रतिष्टित-मस्तु ॥

अग्नि-स्तु विश्रा-वस्त-मं तुवि ब्रह्माण-मुत्त-मं ।
अतू-र्तं श्रावय-त्पातिं पुत्रं ददा-ति दाशुषे ।
अग्नि-र्दादा-ति स-त्पातिं सा सा हयो युधा-नृभीः ।
अग्नि-र-त्यं रघु-ष्य-दं जेतार मपा राजि-तं ॥

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 1 ]

यो देवानां प्रथमं पुरस्ता-द्विश्वा-धियो रुद्रो महर्षिः । हिरण्य-गर्भं
पश्य-त जायमा-नꣳ सनो देव-श्शुभया स्मृत्या स्सय्यु-नक्तु ।

यस्मा-त्पर न्नापर-मस्ति किञ्चि-द्यस्मा न्नाणीयो न
ज्या-यो ऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिव
तिष्ठ-त्ये-कस्ते-नेद पूर्णं पुरुषे-ण सर्वम् ॥

न कर्मणा न प्रजया धने-न त्यागे-नैके अमृत-त्व-मान-शुः ।
परेण नाक-न्निहितङ् गुहाया व्विभ्राज-देत-द्यत-यो विशन्ति ॥

वेदान्त विज्ञान सुनिश्चितार्था स्सन्यास योगा-द्यत-य श्शुद्ध-सत्वाः ।
ते ब्रह्म-लोके तु परान्त काले परा-मृता-त्परि-मुच्यन्ति सर्वे ॥

दह्र विपापं परमेश्म-भूतं य्यत्-पुण्डरीकं पुर-मध्य सꣳ स्थम् ।
त-त्रापि दह्रङ् गगनं विव-शोक स्तस्मिन् यदन्त-स्त-दुपासि-तव्यम् ॥

यो वेदा-दौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृति-लीनस्य यः परे-स्स महेश्वरः ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय
नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो
बलप्रमथाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्य स्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति
र्ब्रह्मणोऽधिपति र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्रयम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय
मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 2 ]

ब्राह्मण एक होता । स यज्ञः ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । यज्ञश्च-मे भूयात् ॥

अग्नि-र्द्विं होता । स भर्ता ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । भर्ता च-मे भूयात् ॥

पृथिवी त्रिहोता । स प्रतिष्ठा ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । प्रतिष्ठा च-मे भूयात् ॥

अन्तरिक्षं चतुर् होता । स विष्ठाः ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । विष्ठाश्च-मे भूयात् ॥

वायुः पञ्च होता । स प्राणः ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । प्राणश्च-मे भूयात् ॥

चन्द्रमा ष्षड्ढोता । स ऋतून् कल्प-याति ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । ऋतवश्च-मे कल्पन्ताम् ॥

अन्नꣳ सप्त होता । स प्राणस्य प्राणः ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । प्राणस्य च-मे प्राणो भूयात् ॥

द्यौ रष्ट होता । सोऽनाधृष्यः ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । अनाधृष्यश्च भूयासम् ॥

आदित्यो नव होता । स तेजस्वी ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । तेजस्वी च भूयासम् ॥

प्रजापति र्दश होता । स इदꣳ सर्वम् ।

स-मे ददातु प्रजां पशून् पुष्टिं यशः । सर्वं च-मे भूयात् ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्रयम्बकाय

त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय

नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय

श्रीमन्महादेवाय नमः ॥

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 3 ]

एष वै विभू र्नाम यज्ञः । सर्वꣳ ह-वै तत्र विभू भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै प्रभू र्नाम यज्ञः । सर्वꣳ ह-वै तत्र प्रभु भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै ऊर्जस्वा-न्नाम यज्ञः । सर्वꣳ ह-वै तत्रोर्जस्व द्भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै पयस्वा-न्नाम यज्ञः । सर्वꣳ ह-वै पयस्व द्भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै विधृतो नाम यज्ञः । सर्वꣳ ह-वै तत्र विधृतं भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै व्यावृत्तो नाम यज्ञः । सर्वꣳ ह-वै तत्र व्यावृत्तं भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै प्रतिष्ठितो नाम यज्ञः । सर्वँ हवै तत्र प्रतिष्ठितं भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै तेजस्वी नाम यज्ञः । सर्वँ ह-वै तत्र तेजस्वि भवति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै ब्रह्मवर्चसी नाम यज्ञः । आह वै तत्र ब्रह्मवर्चसी जायते ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वा अति-व्याधी नाम यज्ञः ।
आह वै तत्र राजन्योऽति-व्याधी जायते ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै दीर्घो नाम यज्ञः । दीर्घायुषो ह-वै तत्र मनुष्या भवन्ति ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै क्लृप्तो नाम यज्ञः । कल्पते ह-वै तत्र प्रजाभ्यो योगक्षेमः ।
यत्रैतेन यज्ञेन यजन्ते ।

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 4 ]

पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो नन्दिः प्रचोदयात् ॥

तत्पुरुषाय विद्महे महा-सेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् ॥

तत्पुरुषाय विद्महे सुवर्ण-पक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् ॥

वेदा-त्मनाय विद्महे हिरण्य-गर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् ॥

नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

वज्र-नखाय विद्महे तीक्ष्ण-दँ ष्ट्राय धीमहि ।

तन्नो नार-सिं हः प्रचोदयात् ॥

भास्कराय विद्महे मह-द्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् ॥

वैश्वा-नराय विद्महे लाली-लाय धीमहि । तन्नो अग्निः प्रचोदयात् ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥

## ॥ शिव पञ्चायतन पूजायां धूपाद्युपचारः ॥

**धूपः**

धूरसि धूर्व धूर्वन्तं धूर्व-तं योऽस्मान् धूर्वति-तं धूर्व यं-वयं
धूर्वा-मस्त्वं देवाना-मसि स-स्नि-तमं पप्रितमं जुष्टतमं वह्नितमं
देवहूतम महुत-मसि हविर्धानं दृꣳ ह-स्व मा-ह्वा-र्मित्रस्य त्वा
चक्षुषा प्रेक्षे मा भे-र्मा संवि-क्था मा-त्वा हिꣳ सिषम् ॥
आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। धूपम् आघ्रापयामि।

**दीपः**

उद्दी-प्यस्व जातवेदोऽपघ्न न्निरृतिं मम।
पशूꣳश्च मह्य-मावह जीवनं च दिशो दिश॥
मा नो हिꣳसी ज्जातवेदो गामश्वं पुरुषं जगत्।
अबि-भ्र-दग्न आग-हि श्रिया मा परि-पातय॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः।
दीपं दर्शयामि। धूप दीपा नंतरं आचमनीयं समर्पयामि॥

**नैवेद्यम्**

ओं भूः भुवः स्सुवः । ओं तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥ देव सवितः प्रसुव ।

सत्यं त्वर्तेन परिषिंचामि ।अमृतोपस्तरणमसि ।

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा ।

मधु-वाता ऋता-यते मधु क्षरन्ति सिन्धवः ।

माध्वी-र्नः सन्त्वोषधीः ॥

मधु-नक्त मुतो-पसि मधुमत्-पार्थि-वꣳ रजः ।

मधु द्यौ-रस्तु नः पिता ॥

मधु-मान्नो वनस्पति र्मधु-माꣳ अस्तु सूर्यः ।

माध्वी-र्गावो भवन्तु नः । मधु मधु मधु ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

दिव्यान्नं घृतगुळपायसं नालिकेर-खण्डद्वयं कदलीफलं महा नैवेद्यं निवेदयामि । मध्ये मध्ये अमृतपानीयं समर्पयामि ।

अमृतापिधानमसि । हस्त प्रक्षा-लनं समर्पयामि ।

पाद् प्रक्षा-लनं समर्पयामि । आचमनियं समर्पयामि ॥

पूगी-फल-समायुक्तं नागवल्ली-दलै-र्यतम् ।

कर्पूर-चूर्ण-संयुक्तं ताम्बूलं प्रति-गृह्यताम् ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

कर्पूर ताम्बूलं निवेदयामि । समस्तो-पचारान् समर्पयामि ॥

## पञ्चमुखदीपं

सप्रथ सभां मे गोपाय । ये च सभ्याः सभा-सदः ।

ता-निन्द्र-यावतः कुरु । सर्व-मायु-रुपा-सताम् ।

अहे बुध्निय-मन्त्रं मे गोपाय । य-मृषय स्त्रै-विदा विदुः ।

ऋचः सामानि यजूꣳषि । सा हि श्री-रमृता सताम् ॥

पञ्च हूतो ह वै नामैषः । तं वा एतं पञ्च हूतꣳ सन्तम् ।

पञ्च होतेत्या चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

पञ्चमुखदीपं दर्शयामि । आचमनीयं समर्पयामि ॥

## कर्पूर नीराजनम्

सोमो वा एतस्य राज्य-मा-दत्ते । यो राजा सन् राज्यो वा
सोमेन यजते । देव-सुवा-मेता-नि हवीꣳ-षि भवन्ति ।
एता-वन्तो वै देवानꣳ सवाः । त ए-वास्मै सवान् पयच्छन्ति ।
त एनं पुनः सु-वन्ते राज्याय । देव-सू-राजा भवति ।
साम्राज्यं-भोज्यं स्वा-राज्यं वै-राज्यं
पारमेष्ठ्यꣳ राज्यं महाराज्य-माधि-पत्यम् ॥
यो वैतां ब्रह्मणो वेद । अमृतेना-वृतां पुरीम् ।
तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः ॥
न तत्र सूर्यो भाति न चन्द्र-तारकं नेमा विद्युतो-भान्ति कुतोऽय-मग्निः ।
तमेव भान्त मनु-भाति सर्वं तस्य भासा सर्व-मिदं विभाति ॥
आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।
सर्वोप-चा-रार्थे कर्पूर-मंगळ-नीराजनं स-न्दर्शयामि ।
बृह-त्साम क्षत्र-भृद् वृद्ध वृष्णियं । त्रिष्टुभौज श्शु-भित मुग्र वीरम् ।
इन्द्र-स्तोमेन पंच-दशेन मध्य-मिदं वातेन सगरेण रक्ष ॥
रक्षां धारयामि ॥

## मन्त्रपुष्पम्

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।

चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

वेदोक्त मन्त्रपुष्पम् समर्पयामि ॥

## सुवर्णपुष्पम्

राजाधि राजाय प्रसह्य साहिने नमो वयं वै-श्रवणाय कुर्महे ।

स मे का-मान्का-म-कामाय मह्यम् कामेश्वरो वै-श्रवणो दधातु ।

कुबेराय वै-श्रवणाय महाराजाय नमः ॥

सुवर्ण-पुष्पम् समर्पयामि ॥ पारिजात-पुष्पम् समर्पयामि ॥

## प्रदक्षिणम्

यानि कानि च पापानि जन्मांतर कृता-नि च ।

तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

प्रकृष्ट पाप नाशाय प्रकृष्ट-फल-सिद्धये ।

प्रदक्षिणं करो-मीश प्रसीद परमेश्वर ॥

# ॥ GHANA PATHA ॥

मयि मेधां मयि प्रजा ग्निभ मय्य स्तेजो दधातु
मयि मेधां मयि प्रजां मयीभन्द्र इन्द्रियं दधातु
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।

मयि मेधां मेधां मयि मयि मेधां मयि मयि मेधां
मयि मयि मेधां मयि ।

मेधां मयि मयि मेधां मेधां मयि प्रजां प्रजां मयि
मेधां मेधां मयि प्रजां ।

मयि प्रजां प्रजां मयि मयि प्रजां मयि मयि प्रजां
मयि मयि प्रजां मयि ।

प्रजां मयि मयि प्रजां प्रजां मयि सूर्य स्सूर्यो मयि
प्रजां प्रजां मयि सूर्यः । प्रजा मिति - प्र - जां ।

मयि सूर्य स्सूर्यो मयि मयि स्सूर्यो भ्राजो भ्राज स्सूर्यो
मयि मयि स्सूर्यो भ्राजः ।

सूर्यो भ्राजो भ्राज सूर्य स्सूर्यो भ्राजो दधातु दधातु भ्राज
स्सूर्य स्सूर्यो भ्राजो दधातु ।
भ्राजो दधातु दधातु भ्राजो भ्राजो दधातु ।
दधात्विति दधातु ।
तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।
प्राङ्ग होतु र्द्धिष्ण्या दुत्सर्पेत् । येयं प्रागाद्यशस्वती ।
सामा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति ।
तेजस्वयेव यशस्वी ब्रह्मवर्चसी भवति ।

मारुत मनर्वाण रथे शुभम् ।

मारुत मनर्वाण मनर्वाणं मारुतं मारुत मनर्वाणꣳ रथेशुभꣳ
रथेशुभ मनर्वाणं मारुतं मारुत मनर्वाणꣳ रथेशुभम् ।
अनर्वाणꣳ रथेशुभꣳ रथेशुभ मनर्वाण मनर्वाणꣳ रथेशुभम् ।
रथेशुभ मिति रथे - शुभम् ।
अतोतो वा उत्तराणि श्रेयाꣳसि भवन्ति ।

सा प्रजां पशून् यजमानाय प्रजनयति ।

सा प्रजां प्रजाꣳ सा सा प्रजां पशून् पशून् प्रजाꣳ सा सा प्रजां पशून् ।

प्रजां पशून् पशून् प्रजां प्रजां पशून् यजमानाय जमानाय पशून् प्रजां प्रजां पशून् यजमानाय ।

प्रजामिति प्र -जां ।

पशून् यजमानाय यजमानाय पशून् पशून् यजमानाय प्र प्र यजमानाय पशून् पशून् यजमानाय प्र ।

यजमानाय प्र प्र यजमानाय यजमानाय प्रजनयति जनयति प्र यजमानाय यजमानाय प्रजनयति ।

प्रजनयति जनयति प्र प्र जनयति । जनयतीति जनयति ।

एतेन वै देवा जैत्वानि जित्वा ।

यं काम म काम यन्त तमाप्नुवन्न् ।

यं कामं कामयते । तमे ते नाप्नोति ।

यस्य पुत्रो जातस्य त्तेज एवास्मिन् ब्रह्मवर्चसं दधाति ।

यस्य पुत्रः पुत्रो यस्य यस्य पुत्रो जातो जातः पुत्रो
यस्य यस्य पुत्रो जातः ।

पुत्रो जातो जातः पुत्रः पुत्रो जात स्स्या त्स्यां ज्जातः
पुत्रः पुत्रो जात स्स्यात् ।

जात स्स्या त्स्या ज्जातो जात स्या त्तेज स्तेज स्या
ज्जातो जात स्या त्तेजः ।

स्या त्तेज स्तेज स्या त्स्या त्तेज एवै व तेज
स्या त्स्या त्तेज एव ।

तेज एवै व त्तेज स्तेज एवा स्मि न्नस्मि न्नेव
तेज स्तेज एवा स्मिन्न ।

एवा स्मि न्नस्मि न्नेवै वाऽस्मिन् ब्रह्मवर्चसं ब्रह्मवर्चस
मस्मि न्ने वै वाऽस्मिन् ब्रह्मवर्चसम् ।

अस्मिन् ब्रह्मवर्चसं ब्रह्मवर्चस मस्मि न्नस्मिन् ब्रह्मवर्चसं

दधाति दधाति ब्रह्मवर्चस मस्मि न्नस्मिन् ब्रह्मवर्चसं दधाति ।

ब्रह्मवर्चसं दधाति दधाति ब्रह्मवर्चसं ब्रह्मवर्चसं दधाति ।

ब्रह्मवर्चस मिति ब्रह्म - वर्चसम् । दधातीति दधाति ।

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।

प्राङा होतु र्द्धिष्ण्या दुत्सर्पेत् ।

येयं प्रागाद्यशस्वती । सामा प्रोर्णोतु ।

तेजसा यशसा ब्रह्मवर्चसेनेति ।

तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति ।

ये देवा दिविभागा इति कृष्णाजिन मवधूनोतीम
एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ॥

ये देवा देवा ये ये देवा दिविभागा दिविभागा देवा

ये ये देवा दिविभागाः ।

देवा दिविभागा दिविभागा देवा देवा दिविभागा इतीति

दिविभागा देवा देवा दिविभागा इति ।

द्विभागा इतीति द्विभागा द्विभागा इति कृष्णाजिनं

कृष्णाजिन-मिति द्विभागा द्विभागा इति कृष्णाजिनम् ।

द्विभागा इति द्वि -भागा ।

इति कृष्णाजिनं कृष्णाजिन मितीति कृष्णाजिन

म-वाव कृष्णाजिन मितीति कृष्णाजिन मव ।

कृष्णाजिन म-वाव कृष्णाजिनं कृष्णाजिन मव धूनोति

धूनोत्यव कृष्णाजिनं कृष्णाजिन मवधूनोति ।

कृष्णाजिन मिति कृष्ण - अजिनम् ।

अवधूनोति धूनोत्य वाव धूनोतीम इमे धूनोत्य वाव धूनोतीमे ।

धूनोतीम इमे धूनोति धूनोतीम एवैवेमे धूनोति धूनोतीम एव ।

इम एवैवेम इम एवास्मा अस्मा एवेम इम एवास्मै ।

एवास्मा अस्मा एवैवास्मै लोका लोका अस्मा एवैवास्मै लोकाः ।

अस्मै लोका लोका अस्मा अस्मै लोका प्रीताः प्रीता

लोका अस्मा अस्मै लोका प्रीताः ।

लोका प्रीता प्रीता लोका लोका प्रीता अभीष्टा अभीष्टा

प्रीता लोका लोका प्रीता अभीष्टाः।

प्रीता अभीष्टा अभीष्टाः प्रीताः प्रीता अभीष्टा भवन्ति

भवन्त्यभीष्टाः प्रीताः प्रीता अभीष्टा भवन्ति।

अभीष्टा भवन्ति भवन्त्यभीष्टा अभीष्टा भवन्ति।

अभीष्टा इत्यभि  इष्टाः। भवन्तीति भवन्ति।

हृदयं यजूꣳषि पत्न्यश्च। यथावकाशं ग्रहान्।

यथावकाशं प्रतिग्रहान् ल्लोकं पृणाश्च।

सर्वा हास्यै ता देवताः प्रीता अभीष्टा भवन्ति।

प्रजामायुर् धनं च।

प्रजामायुरायुः प्रजां प्रजामायु र्धनं धनमायुः प्रजां

प्रजामायु र्धनं। प्रजामिति प्र - जां ।

आयु र्धनं धनमायुरायु र्धनं च च धनमायुरायु र्धनं च।

धनं च च धनं धनं च। चेति च।

पश्यति पुत्रं । पश्यति पौत्रं । प्र प्रजया पशुभि-र्मिथुनै र्जायते ।
यस्यैवं विधुषोऽग्निहोत्रं जुह्वति । य उ चैन देवं वेद ।

सर्वेभ्यो वै कामेभ्यः सन्धिर्दुहे तद्यजमाना
स्सर्वान् कामान वरुन्ध ते ।

सर्वेभ्यो वै वै सर्वेभ्यः सर्वेभ्यो वै कामेभ्यः कामेभ्यो वै
सर्वेभ्यः सर्वेभ्यो वै कामेभ्यः ।
वै कामेभ्यः कामेभ्यो वै वै कामेभ्य स्सन्धि स्सन्धिः
कामेभ्यो वै वै कामेभ्य स्सन्धिः ।
कामेभ्य स्सन्धि स्सन्धिः कामेभ्यः कामेभ्यः सन्धिर्दुहे
दुहे सन्धिः कामेभ्यः कामेभ्यः सन्धिर्दुहे ।
सन्धिर्दुहे दुहे सन्धि स्सन्धिर्दुहे तत्तद् दुहे सन्धि
स्सन्धिर्दुहे तत् । सन्धिरिति सं - धिः ।
दुहे तत्तद् दुहे दुहे तद्यजमाना यजमाना
स्तद् दुहे दुहे तद्यजमानाः ।

तद्यजमाना यजमाना स्तत्त-द्यजमाना स्स्वर्वान्

त्सर्वाँन्॒ यजमाना स्तत्त-द्यजमाना स्स्वर्वाँन्॒ ।

यजमाना स्स्वर्वान्॒ त्सर्वाँन्॒ यजमाना यजमाना स्स्वर्वान्॒

कामान्॒ कामान्॒ त्सर्वाँन्॒ यजमाना यजमाना स्स्वर्वान्॒ कामाँन्॒ ।

स्स्वर्वान्॒ कामान्॒ कामान्॒ त्सर्वान्॒ त्सर्वान्॒ कामान वाव

कामान्॒ त्सर्वान्॒ त्सर्वान्॒ कामान व ।

कामान वाव कामान्॒ कामान वरुन्ध ते रुन्ध तेऽव

कामान्॒ कामान वरुन्ध ते ।

अव रुन्ध ते रुन्ध तेऽ वाव रुन्ध ते । रुन्ध त इति रुन्ध

ते । सांग्रहण्येष्ट्या यजते । इमां जनताꣳ संगृह्णानीति ।

द्वादशा रत्नी रशना भवति । द्वादशमासा स्संवत्सरः ।

स्संवत्सर मेवा वरुन्धे । मौंजी भवति । ऊर्ग्वै मुञ्चाः ।

ऊर्ज मेवा वरुन्धे । चित्रा नक्षत्रं भवति ।

चित्रं वा एतत् कर्म । य दश्व मेध स्समृद्ध्यै ।

पुष्टिं धत्तः पुष्यति प्रजया पशुभिः ।

पुष्टिं धत्तो धत्तः पुष्टिं पुष्टिं धत्तः पुष्यति पुष्यति धत्तः

पुष्टिं पुष्टिं धत्तः पुष्यति ।

धत्तः पुष्यति पुष्यति धत्तो धत्तः पुष्यति प्रजया प्रजया

पुष्यति धत्तो धत्तः पुष्यति प्रजया ।

पुष्यति प्रजया प्रजया पुष्यति पुष्यति प्रजया पशुभिः

पशुभिः प्रजया पुष्यति पुष्यति प्रजया पशुभिः ।

प्रजया पशुभिः पशुभिः प्रजया प्रजया पशुभिः ।

प्रज येति प्र - जया । पशुभिरिति पशु - भिः ।

पुष्ट्यै वा एतद्रूपं । यदजा ।

त्रिस्संवत्सर स्यान्यान्  पशून् परि प्रजायते ।

बस्ताजिन मद्ध्य व रोहति । पुष्ट्या मेव प्रजनने प्रतितिष्ठति ।

ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं

पाहिमां यज्ञनियं ।

ता विष्णो विष्णो तास्ता विष्णो पाहि पाहि

विष्णो तास्ता विष्णो पाहि ।

विष्णो पाहि पाहि विष्णो विष्णो पाहि पाहि

पाहि पाहि विष्णो विष्णो पाहि पाहि । विष्णो इति - विष्णो ।

पाहि पाहि पाहि पाहि पाहि पाहि यज्ञं

यज्ञं पाहि पाहि पाहि पाहि यज्ञं ।

पाहि यज्ञं यज्ञं पाहि पाहि यज्ञं पाहि पाहि यज्ञं

पाहि पाहि यज्ञं पाहि ।

यज्ञं पाहि पाहि यज्ञं यज्ञं पाहि यज्ञपतिं यज्ञपतिं

पाहि यज्ञं यज्ञं पाहि यज्ञपतिं ।

पाहि यज्ञपतिं यज्ञपतिं पाहि पाहि यज्ञपतिं पाहि

पाहि यज्ञपतिं पाहि पाहि यज्ञपतिं पाहि ।

यज्ञपतिं पाहि पाहि यज्ञपतिं यज्ञपतिं पाहि मां मां

पाहि यज्ञपतिं यज्ञपतिं पाहि मां । यज्ञपति मिति यज्ञ - पतिं ।

पाहि मां मां पाहि पाहि मां यज्ञनियं यज्ञनियं

मां पाहि पाहि मां यज्ञनियं ।

मां यज्ञनियं यज्ञनियं मां मां यज्ञनियं ।

यज्ञनियमिति यज्ञ - नियं । ता विष्णो पाहित्याह ।

यज्ञो वै विष्णुः । यज्ञस्य धृत्यै ।

पाहि यज्ञं पाहि यज्ञपतिं पाहिमां यज्ञनियमित्याह ।

यज्ञाय यजमानायात्मने । नेद् एवाऽशिष माशास्ते नादये ।

जीवातुश्च मे दीर्घायुत्वं च मे ऽनमित्रं च मे ऽभयं च मे
सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥

मे जीवातु र्जीवातु र्मे मे जीवातु श्च च र्जीवातु र्मे मे जीवातु श्च ।

जीवातु श्च च जीवातु र्ज्जीवातु श्च मे मे च जीवातु

र्ज्जीवातु श्च मे ।

च मे मे च च मे दीर्घायुत्वं दीर्घायुत्वं मे च च मे दीर्घायुत्वं ।

मे दीर्घायुत्वं दीर्घायुत्वं मे मे दीर्घायुत्वं च च

दीर्घायुत्वं मे मे दीर्घायुत्वं च ।

दीर्घायुत्वं च च दीर्घायुत्वं दीर्घायुत्वं च मे मे च

दीर्घायुत्वं दीर्घायुत्वं च मे । दीर्घायुत्व मिति दीर्घायु -त्वं ।

च मे मे च च मे नमित्र मनमित्रं  मे च च मे नमित्रं  ।

मे नमित्र मनमित्रं मे मे नमित्रं च चा नमित्रं मे मे नमित्रं च ।

अनमित्रं च चा नमित्र मनमित्रं च मे मे चा

नमित्र मनमित्रं च मे ।

च मे मे च च मे भय मभयं मे च च मे भयं  ।

मे भय मभयं मे मे भयं च चा भयं मे मे भयं च ।

अभयं च चा भय मभयं च मे मे चा भय मभयं च मे ।

च मे मे च च मे सुगꣳ सुगं मे च च मे सुगं ।

मे सुगꣳ सुगं  मे मे सुगं च च सुगं मे मे सुगं च ।

सुगं च च सुगऽ सुगं  च मे मे च सुगऽ सुगं च मे ।

सुग मिति सु – गं ।

च मे मे च च मे शयनऽ शयनं मे च च मे शयनं ।

मे शयनऽ शयनं मे मे शयनं च च शयनं मे मे शयनं च ।

शयनं च च शयनऽ शयनं च मे मे च शयनऽ शयनं च मे ।

च मे मे च च मे सूषा सूषा मे च च मे सूषा ।

मे सूषा सूषा मे मे सूषा च च सूषा मे मे सूषा च ।

सूषा च च सूषा सूषा च मे मे च सूषा सूषा च मे ।

सूषेति सु – उषा ।

च मे मे च च मे सुदिनऽ सुदिनं मे च च मे सुदिनं ।

मे सुदिनऽ सुदिनं मे मे सुदिनं च च सुदिनं मे मे सुदिनं च ।

सुदिनं च च सुदिनऽ सुदिनं च मे मे च सुदिनऽ सुदिनं च मे ।

सुदिन मिति सु – दिनं । च मे मे च च मे ।

म इति मे ।





# ॥ नवग्रहमन्त्रः ॥

श्रीगणेशाय नमः ।

अथ सूर्यस्य मन्त्रः - विश्वनाथसारोद्धारे

ॐ ह्सौः श्रीं आं ग्रहाधिराजाय आदित्याय स्वाहा ॥

अथ चन्द्रस्य मन्त्रः - कालीपटले

ॐ श्रीं क्रीं ह्रां चं चन्द्राय नमः ॥

अथ भौमस्य मन्त्रः - शारदाटीकायाम्

ऐं ह्सौः श्रीं द्रां कं ग्रहाधिपतये भौमाय स्वाहा ॥

अथ बुधस्य मन्त्रः - स्वतन्त्रे

ॐ ह्रां क्रीं टं ग्रहनाथाय बुधाय स्वाहा ॥

अथ जीवस्य मन्त्रः - त्रिपुरातिलके

ॐ ह्रीं श्रीं ख्रीं ऐं ग्लौं ग्रहाधिपतये
बृहस्पतये ब्रींठः ऐंठः श्रींठः स्वाहा ॥

अथ शुक्रस्य मन्त्रः - आगमशिरोमणौ

ॐ ऐं जं गं ग्रहेश्वराय शुक्राय नमः ॥

अथ शनैश्चरस्य मन्त्रः - आगमलहर्याम्

ॐ ह्रीं श्रीं ग्रहचक्रवर्तिने शनैश्चराय क्लीं ऐंसः स्वाहा ॥

अथ राहोर्मन्त्रः - आगमलहर्याम्

ॐ क्रीं क्रीं हूँ हूँ टं टङ्कधारिणे
राहवे रं ह्रीं श्रीं भैं स्वाहा ॥

अथ केतु मन्त्रः - मन्त्रमुक्तावल्याम्

ॐ ह्रीं क्रूं क्रूररूपिणे केतवे ऐं सौः स्वाहा ॥

॥ इति नवग्रहमन्त्रः सम्पूर्णम् ॥

# ॥ नवग्रहपीडाहरस्तोत्रम् ॥

ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।
विषमस्थानसंभूतां पीडां हरतु मे रविः ॥ १ ॥

रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः ।
विषमस्थानसंभूतां पीडां हरतु मे विधुः ॥ २ ॥

भूमिपुत्रो महातेजा जगतां भयकृत् सदा ।
वृष्टिकृद्वृष्टिहर्ता च पीडां हरतु मे कुजः ॥ ३ ॥

उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥ ४ ॥

देवमन्त्री विशालाक्षः सदा लोकहिते रतः ।
अनेकशिष्यसंपूर्णः पीडां हरतु मे गुरुः ॥ ५ ॥

दैत्यमन्त्री गुरुस्तेषां प्राणदश्च महामतिः ।
प्रभुस्ताराग्रहाणां च पीडां हरतु मे भृगुः ॥ ६ ॥

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।
मन्दचारः प्रसन्नात्मा पीडां हरतु मे शनिः ॥ ७ ॥

महाशिरा महावक्रो दीर्घदंष्ट्रो महाबलः ।
अतनुश्चोर्ध्वकेशश्च पीडां हरतु मे शिखी ॥ ८ ॥

अनेकरूपवर्णैश्च शतशोऽथ सहस्रशः ।
उत्पातरूपो जगतां पीडां हरतु मे तमः ॥ ९ ॥

॥ इति ब्रह्माण्डपुराणोक्तं नवग्रहपीडाहरस्तोत्रं संपूर्णम् ॥

# ॥ श्रीयाज्ञवल्क्यकृतं श्रीसूर्यस्तोत्रं ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ ॐ श्रीमहागणाधिपतये नमः ॥

ॐ नमो भगवते आदित्यायाखिलजगतां आत्मस्वरूपेण
कालस्वरूपेण चतुर्विधभूत-निकायानां ब्रह्मादिस्तम्भ-पर्यन्तानां
अन्तर्हृदयेषु बहिरपि चाकाश इव उपाधिनाऽव्यवधीयमानो
भवानेक एव क्षणलव-निमेषावयवोपचित-संवत्सरगणेन
अपा-मादान-विसर्गाभ्यां इमां लोकयात्रां अनुवहति ॥ १

यदुह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनं अहरहः
आम्नायविधिना उपतिष्ठमानानां अखिल-दुरित-
वृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमण्डलम् ॥ २

य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मन-
इन्द्रियासुगणान् अनात्मनः स्वयमात्मा अन्तर्यामी प्रचोदयति ॥

य एवेमं लोकं अतिकराल-वदनान्धकार-संज्ञा-जगरग्रह-गिलितं मृतकमिव विचेतनं अवलोक्य अनुकम्पया परमकारुणिकः ईक्षयैव उत्थाप्य अहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयति अवनिपतिरिव असाधूनां भयमुदीरयन्नटति ॥ ४

परित आशापालैः तत्र तत्र कमलकोशाञ्जलिभिः उपहृतार्हणः ॥ ५

अथह भगवन् तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितं अहं अयातयामयजुःकामः उपसरामीति ॥ ६

एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ ७

॥ इति श्रीमद्भागवते द्वादशस्कन्धे श्रीयाज्ञवल्क्यकृतं श्रीसूर्यस्तोत्रं संपूर्णम् ॥

# ॥ सूर्याष्टकम् ॥

॥ श्री गणेशाय नमः ॥

सामब उवाच ॥

आदिदेवं नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तुते ॥ १ ॥

सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ २ ॥

लोहितं रथमारूढं सर्वलोकपितामहम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ३ ॥

त्रैगुण्यं च महाशूरं ब्रह्माविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ४ ॥

बृंहितं तेजःपुंजं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥ ५ ॥

बन्धूकपुष्पसंकाशं हारकुंडलभूषितम् ।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ६ ॥

तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ७ ॥

तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ८ ॥

सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम् ।
अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् ॥ ९ ॥

आमिशं मधुपानं च यः करोति रवेर्दिने ।
सप्तजन्म भवेद्रोगी प्रतिजन्म दरिद्रता ॥ १० ॥

स्त्रीतैलमधुमांसानि यस्त्यजेत्तु रवेर्दिने ।
न व्याधिः शोकदारिद्र्यं सूर्यलोकं स गच्छति ॥ ११ ॥

इति श्री सूर्याष्टकस्तोत्रं संपूर्णम् ॥

# ॥ सूर्यकवच ॥

श्रीभैरव उवाच

योे देवदेवो भगवान् भास्करो महसां निधिः ।
गयत्रीनायको भास्वान् सवितेति प्रगीयते ॥ १ ॥

तस्याहं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वमन्त्रमयं गुह्यं मूलविद्यारहस्यकम् ॥ २ ॥

सर्वपापापहं देवि दुःखदारिद्र्यनाशनम् ।
महाकुष्ठहरं पुण्यं सर्वरोगनिवर्हणम् ॥ ३ ॥

सर्वशत्रुसमूहघ्नं सम्ग्रामे विजयप्रदम् ।
सर्वतेजोमयं सर्वदेवदानवपूजितम् ॥ ४ ॥

रणे राजभये घोरे सर्वोपद्रवनाशनम् ।
मातृकावेष्टितं वर्म भैरवाननिर्गतम् ॥ ५ ॥

ग्रहपीडाहरं देवि सर्वसङ्कटनाशनम् ।
धारणादस्य देवेशि ब्रह्मा लोकपितामहः ॥ ६ ॥

विष्णुर्नारायणो देवि रणे दैत्याञ्जिष्यति ।
शङ्करः सर्वलोकेशो वासवोऽपि दिवस्पतिः ॥ ७ ॥

ओषधीशः शशी देवि शिवोऽहं भैरवेश्वरः ।
मन्त्रात्मकं परं वर्म सवितुः सारमुत्तमम् ॥ ८ ॥

यो धारयेद् भुजे मूर्ध्नि रविवारे महेश्वरि ।

स राजवल्लभो लोके तेजस्वी वैरिमर्दनः ॥ ९ ॥
बहुनोक्तेन किं देवि कवचस्यास्य धारणात् ।
इह लक्ष्मीधनारोग्य-वृद्धिर्भवति नान्यथा ॥ १० ॥
परत्र परमा मुक्तिर्देवानामपि दुर्लभा ।
कवचस्यास्य देवेशि मूलविद्यामयस्य च ॥ ११ ॥
वज्रपञ्जरकाख्यस्य मुनिर्ब्रह्मा समीरितः ।
गायत्र्यं छन्द इत्युक्तं देवता सविता स्मृतः ॥ १२ ॥
माया बीजं शरत् शक्तिर्नमः कीलकमीश्वरि ।
सर्वार्थसाधने देवि विनियोगः प्रकीर्तितः ॥ १३ ॥
ओं अं आं इं ईं शिरः पातु ओं सूर्यो मन्त्रविग्रहः ।
उं ऊं ऋं ॠं ललाटं मे ह्रां रविः पातु चिन्मयः ॥ १४ ॥
ऌं ॡं एं ऐं पातु नेत्रे ह्रीं ममारुणसारथिः ।
ओं औं अं अः श्रुती पातु सः सर्वजगदीश्वरः ॥ १५ ॥
कं खं गं घं पातु गण्डौ सूं सूरः सुरपूजितः ।
चं छं जं झं च नासां मे पातु यां अर्यमा प्रभुः ॥ १६ ॥
टं ठं डं ढं मुखं पायाद् यं योगीश्वरपूजितः ।
तं थं दं धं गलं पातु नं नारायणवल्लभः ॥ १७ ॥
पं फं बं भं मम स्कन्धौ पातु मं महसां निधिः ।
यं रं लं वं भुजौ पातु मूलं सकनायकः ॥ १८ ॥

शं षं सं हं पातु वक्षो मूलमन्त्रमयो ध्रुवः ।
ळं क्षः कुक्षिं सदा पातु ग्रहाथो दिनेश्वरः ॥ १९ ॥
ङं ञं णं नं मं मे पातु पृष्ठं दिवसनायकः ।
अं आं इं ईं उं ऊं ऋं ॠं नाभिं पातु तमोपहः ॥ २० ॥
ऌं ॡं एं ऐं ओं औं अं अः लिङ्गं मेऽव्याद् ग्रहेश्वरः ।
कं खं गं घं चं छं जं झं कटिं भानुर्ममावतु ॥ २१ ॥
टं ठं डं ढं तं थं दं धं जानू भास्वान् ममावतु ।
पं फं बं भं यं रं लं वं जङ्घे मेऽव्याद् विभाकरः ॥ २२ ॥
शं षं सं हं ळं क्षः पातु मूलं पादौ त्रयितनुः ।
ङं ञं णं नं मं मे पातु सविता सकलं वपुः ॥ २३ ॥
सोमः पूर्वे च मां पातु भौमोऽग्नौ मां सदावतु ।
बुधो मां दक्षिणे पातु नैऋत्या गुररेव माम् ॥ २४ ॥
पश्चिमे मां सितः पातु वायव्यां मां शनैश्चरः ।
उत्तरे मां तमः पायादैशान्यां मां शिखी तथा ॥ २५ ॥
ऊर्ध्वं मां पातु मिहिरो मामधस्ताञ्जगत्पतिः ।
प्रभाते भास्करः पातु मध्याह्ने मां दिनेश्वरः ॥ २६ ॥
सायं वेदप्रियः पातु निशीथे विस्फुरापतिः ।
सर्वत्र सर्वदा सूर्यः पातु मां चक्रनायकः ॥ २७ ॥
रणे राजकुले द्यूते विदादे शत्रुसङ्कटे ।
सङ्गामे च ज्वरे रोगे पातु मां सविता प्रभुः ॥ २८ ॥

ओं ओं ओं उत ओंउॐ ह स म यः सूरोऽवतान्मां भयाद् ।
ह्रां ह्रीं ह्रुं हहहा हसौः हसहसौः हंसोऽवतात् सर्वतः ।
सः सः सः ससस नृपाद्वनचराच्चौराद्रणात् संकटात् ।
पायान्मां कुलनायकोऽपि सविता ओं ह्रीं ह सौः सर्वदा ॥ २९
द्रां द्रीं द्रूं दधनं तथा च तरणिर्भाभैर्भयाद् भास्करो
रां रीं रूं रुरुरूं रविज्र्वरभयात् कुष्ठाच्च शूलामयात् ।
अं अं आं विविवीं महामयभयं मां पातु मार्तण्डको
मूलव्याप्ततनुः सदावतु परं हंसः सहस्रांशुमान् ॥ ३० ॥
इति श्रीकवच्चं दिव्यं वज्रपञ्जरकाभिधम् ।
सर्वदेवरहस्यं च मातृकामन्त्रवेष्टितम् ॥ ३१ ॥
महारोगभयघ्नं च पापघ्नं मन्मुखोदितम् ।
गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं शिवे ॥ ३२ ॥
लिखित्वा रविवारे तु तिष्ये वा जन्मभे प्रिये ।
अष्टगन्धेन दिव्येन सुधाक्षीरेण पार्वति ॥ ३३ ॥
अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि ।
कनकीकाष्ठलेखन्या कवचं भास्करोदये ॥ ३४ ॥
श्वेतसूत्रेण रक्तेन श्यामेनावेष्टयेद् गुटीम् ।
सौवर्णेनाथ संवेष्ठ्य धारयेन्मूर्ध्नि वा भुजे ॥ ३५ ॥
रणे रिपूञ्जयेद् देवि वादे सदसि जेष्यति ।
राजमान्यो भवेन्नित्यं सर्वतेजोमयो भवेत् ॥ ३६ ॥

कण्ठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी ।
शिरःस्था गुटिका दिव्या राकलोकवशङ्करी ॥ ३७ ॥
भुजस्था धनदा नित्यं तेजोबुद्धिविवर्धिनी ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥ ३८ ॥
कण्ठे सा धारयेन्नित्यं बहुपुत्रा प्रजायये ।
यस्य देहे भवेन्नित्यं गुटिकैषा महेश्वरि ॥ ३९ ॥
महास्त्राणीन्द्रमुक्तानि ब्रह्मास्त्रादीनि पार्वति ।
तद्देहं प्राप्य व्यर्थानि भविष्यन्ति न संशयः ॥ ४० ॥
त्रिकालं यः पठेन्नित्यं कवचं वज्रपञ्जरम् ।
तस्य सद्यो महादेवि सविता वरदो भवेत् ॥ ४१ ॥
अज्ञात्वा कवचं देवि पूजयेद् यस्त्रयीतनुम् ।
तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फलम् ॥ ४२ ॥
शतावर्तं पठेद्वर्म सप्तम्यां रविवासरे ।
महाकुष्ठार्दितो देवि मुच्यते नात्र संशयः ॥ ४३ ॥
निरोगो यः पठेद्वर्म दरिद्रो वज्रपञ्जरम् ।
लक्ष्मीवाञ्जायते देवि सद्यः सूर्यप्रसादतः ॥ ४४ ॥
भक्त्या यः प्रपठेद् देवि कवचं प्रत्यहं प्रिये ।
इह लोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥ ४५ ॥

इति श्रीरुद्रयामले तन्त्रे श्रीदेविरहस्ये
वज्रपञ्जराख्यसूर्यकवचनिरूपणं त्रयस्त्रिंशः पटलः ॥

# ॥ सूर्यकवचस्तोत्रम् ॥

श्रीगणेशाय नमः ।

याज्ञवल्क्य उवाच ।

श्रृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ १ ॥

देदीप्यमानमुकुटं स्फुरन्मकरकुण्डलम् ।
ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ २ ॥

शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ।
नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥ ३ ॥

घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः ।
जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥ ४ ॥

स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः ॥ ५ ॥

सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥ ६ ॥

सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ।
स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विन्दति ॥ ७ ॥

॥ इति श्रीमद्याज्ञवल्क्यमुनिविरचितं सूर्यकवचस्तोत्रं सम्पूर्णम् ॥

# ॥ अङ्गारकस्तोत्रम् ॥

अस्य श्री अङ्गारकस्तोत्रस्य ।
विरूपाङ्गिरस ऋषिः । अग्निर्देवता । गायत्री छन्दः ।
भौमप्रीत्यर्थं जपे विनियोगः ।

अङ्गारकः शक्तिधरो लोहिताङ्गो धरासुतः ।
कुमारो मङ्गलो भौमो महाकायो धनप्रदः ॥ १ ॥
ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः ।
विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः ॥ २ ॥
सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः ।
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः ॥ ३ ॥
रक्तमाल्यधरो हेमकुण्डली ग्रहनायकः ।
नामान्येतानि भौमस्य यः पठेत्सततं नरः ॥ ४ ॥
ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति ।
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् ॥ ५ ॥
वंशोद्द्योतकरं पुत्रं लभते नात्र संशयः ।
योऽर्चयेदह्नि भौमस्य मङ्गलं बहुपुष्पकैः ॥ ६ ॥
सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् ॥ ७ ॥

॥ इति श्रीस्कन्दपुराणे अङ्गारकस्तोत्रं संपूर्णम् ॥

# ॥ चन्द्रकवचम् ॥

श्रीगणेशाय नमः।

अस्य श्रीचन्द्रकवचस्तोत्रमन्त्रस्य गौतम् ऋषिः।

अनुष्टुप् छन्दः, श्रीचन्द्रो देवता, चन्द्रप्रीत्यर्थं जपे विनियोगः।

समं चतुर्भुजं वन्दे केयूरमुकुटोज्ज्वलम्।
वासुदेवस्य नयनं शङ्करस्य च भूषणम्॥ १॥
एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं शुभम्।
शशी पातु शिरोदेशं भालं पातु कलानिधिः॥ २॥
चक्षुषी चन्द्रमाः पातु श्रुती पातु निशापतिः।
प्राणं क्षपाकरः पातु मुखं कुमुदबान्धवः॥ ३॥
पातु कण्ठं च मे सोमः स्कन्धे जैवातृकस्तथा।
करौ सुधाकरः पातु वक्षः पातु निशाकरः॥ ४॥
हृदयं पातु मे चन्द्रो नाभिं शङ्करभूषणः।
मध्यं पातु सुरश्रेष्ठः कटिं पातु सुधाकरः॥ ५॥
ऊरू तारापतिः पातु मृगाङ्को जानुनी सदा।
अब्धिजः पातु मे जङ्घे पातु पादौ विधुः सदा॥ ६॥
सर्वाण्यन्यानि चाङ्गानि पातु चन्द्रोऽखिलं वपुः।
एतद्धि कवचं दिव्यं भुक्तिमुक्तिप्रदायकम्।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत्॥ ७॥

॥ इति श्रीचन्द्रकवचं सम्पूर्णम्॥

# ॥ मङ्गलकवचम् ॥

श्रीगणेशाय नमः ।

अस्य श्रीअङ्गारककवचस्तोत्रमन्त्रस्य कश्यप ऋषिः,
अनुष्टुप् छन्दः, अङ्गारको देवता, भौमप्रीत्यर्थं जपे विनियोगः ।

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥ १

अङ्गारकः शिरो रक्षेन्मुखं वै धरणीसुतः ।
श्रवौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः ॥ २ ॥

नासां शक्तिधरः पातु मुखं मे रक्तलोचनः ।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥ ३ ॥

वक्षः पातु वराङ्गश्च हृदयं पातु रोहितः ।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥ ४ ॥

जानुजङ्घे कुजः पातु पादौ भक्तप्रियः सदा ।
सर्वाण्यन्यानि चाङ्गानि रक्षेन्मे मेषवाहनः ॥ ५ ॥

य इदं कवचं दिव्यं सर्वशत्रुनिवारणम् ।
भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम् ॥ ६ ॥

सर्वरोगहरं चैव सर्वसम्पत्प्रदं शुभम् ।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ।
रोगबन्धविमोक्षं च सत्यमेतन्न संशयः ॥ ७ ॥

॥ इति श्रीमार्कण्डेयपुराणे मङ्गलकवचं सम्पूर्णम् ॥

# ॥ ऋणमोचक मङ्गलस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकायः सर्वकर्मविरोधकः ॥ १ ॥

लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥ २ ॥

अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥ ३ ॥

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ ४ ॥

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥ ५ ॥

स्तोत्रमङ्गारकस्यैतत्पठनीयं सदा नृभिः ।
न तेषां भौमजा पीडा स्वल्पाऽपि भवति क्वचित् ॥ ६ ॥

अङ्गारक महाभाग भगवन्भक्तवत्सल ।
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥ ७ ॥

ऋणरोगादिदारिद्र्यं ये चान्ये ह्यपमृत्यवः ।
भयक्लेशमनस्तापा नश्यन्तु मम सर्वदा ॥ ८ ॥

अतिवक्र दुराराध्य भोगमुक्त जितात्मनः ।
तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ ९ ॥

विरिंचिशक्रविष्णूनां मनुष्याणां तु का कथा।
तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः॥ १० ॥
पुत्रान्देहि धनं देहि त्वामस्मि शरणं गतः।
ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः॥ ११ ॥
एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम्।
महतिं श्रियमाप्नोति ह्यपरो धनदो युवा॥ १२ ॥

## ॥ बुधकवचम् ॥

श्रीगणेशाय नमः।
अस्य श्रीबुधकवचस्तोत्रमन्त्रस्य कश्यप ऋषिः,
अनुष्टुप् छन्दः, बुधो देवता, बुधप्रीत्यर्थं जपे विनियोगः।
बुधस्तु पुस्तकधरः कुङ्कुमस्य समद्युतिः।
पीताम्बरधरः पातु पीतमाल्यानुलेपनः॥ १ ॥
कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा।
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः॥ २ ॥
घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम।
कण्ठं पातु विधोः पुत्रो भुजौ पूस्तकभूषणः॥ ३ ॥
वक्षः पातु वराङ्गश्च हृदयं रोहिणीसुतः।
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः॥ ४ ॥
जानुनी रौहिणेयश्च पातु जङ्घेऽखिलप्रदः।

पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥ ५ ॥
एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम् ।
सर्वरोगप्रशमनं सर्वदुःखनिवारणम् ॥ ६ ॥
आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्धनम् ।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ ७ ॥
॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं सम्पूर्णम् ॥

## ॥ बृहस्पतिस्तोत्रम् ॥

श्री गणेशाय नमः ।
अस्य श्रीबृहस्पतिस्तोत्रस्य गृत्समद ऋषिः, अनुष्टुप् छन्दः, बृहस्पतिर्देवता, बृहस्पतिप्रीत्यर्थं जपे विनियोगः ।
गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदांवरः ।
वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ॥ १ ॥
सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ।
दयाकरः सौम्यमूर्तिः सुराच्र्यः कुङ्मलद्युतिः ॥ २ ॥
लोकपूज्यो लोकगुरुर्नीतिज्ञो नीतिकारकः ।
तारापतिश्चाङ्गिरसो वेदवैद्यपितामहः ॥ ३ ॥
भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नरः ॥ ४ ॥

जीवेद्वर्षशतं मर्त्यो पापं नश्यति नश्यति ।
यः पूजयेद्गुरुदिने पीतगन्धाक्षताम्बरैः ॥ ५ ॥
पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्राह्मणान्भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः ॥ ६ ॥
॥ इति श्रीस्कन्दपुराणे बृहस्पतिस्तोत्रं सम्पूर्णम् ॥

## ॥ बृहस्पतिकवचम् ॥

श्रीगणेशाय नमः ।
अस्य श्रीबृहस्पतिकवचस्तोत्रमन्त्रस्य ईश्वर ऋषिः,
अनुष्टुप् छन्दः, गुरुर्देवता, गं बीजं, श्रीशक्तिः,
क्लीं कीलकं, गुरुप्रीत्यर्थं जपे विनियोगः ।
अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम् ।
अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम् ॥ १ ॥
बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः ।
कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः ॥ २ ॥
जिह्वां पातु सुराचार्यो नासां मे वेदपारगः ।
मुखं मे पातु सर्वज्ञो कण्ठं मे देवतागुरुः ॥ ३ ॥
भुजावाङ्गिरसः पातु करौ पातु शुभप्रदः ।
स्तनौ मे पातु वागीशः कुक्षिं मे शुभलक्षणः ॥ ४ ॥

नाभिं देवगुरुः पातु मध्यं पातु सुखप्रदः ।
कटिं पातु जगद्वन्द्य ऊरू मे पातु वाक्पतिः ॥ ५ ॥
जानुजङ्घे सुराचार्यो पादौ विश्वात्मकस्तथा ।
अन्यानि यानि चाङ्गानि रक्षेन्मे सर्वतो गुरुः ॥ ६ ॥
इत्येतत्कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः ।
सर्वान्कामानवाप्नोति सर्वत्र विजयी भवेत् ॥ ७ ॥
॥ इति श्रीब्रह्मयामलोक्तं बृहस्पतिकवचं सम्पूर्णम् ॥

## ॥ शुक्रकवचम् ॥

श्रीगणेशाय नमः ।
मृणालकुन्देन्दुपयोजसुप्रभं पीताम्बरं प्रसृतमक्षमालिनम् ।
समस्तशास्त्रार्थविधिं महान्तं ध्यायेत्कविं वाञ्छितमर्थसिद्धये ॥ १
ॐ शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः ।
नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः ॥ २ ॥
पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः ।
वचनं चोशनाः पातु कण्ठं श्रीकण्ठभक्तिमान् ॥ ३ ॥
भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः ।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ॥ ४ ॥
कटिं मे पातु विश्वात्मा उरू मे सुरपूजितः ।

जानुं जाड्यहरः पातु जङ्घे ज्ञानवतां वरः ॥ ५ ॥
गुल्फौ गुणनिधिः पातु पातु पादौ वराम्बरः ।
सर्वाण्यङ्गानि मे पातु स्वर्णमालापरिष्कृतः ॥ ६ ॥
य इदं कवचं दिव्यं पठति श्रद्धयान्वितः ।
न तस्य जायते पीडा भार्गवस्य प्रसादतः ॥ ७ ॥
॥ इति श्रीब्रह्माण्डपुराणे शुक्रकवचं सम्पूर्णम् ॥

# ॥ श्रीशनैश्चरमालामन्त्रः ॥

॥श्रीः ॥

अस्य श्रीशनैश्चरमालामन्त्रस्य काश्यप ऋषिः, अनुष्टुप् छन्दः, शनैश्चरो देवता, शं बीजं, निं शक्तिः, मं कीलकं, समस्तपीडा परिहारार्थे शनैश्चरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

शनैश्चराय अङ्गुष्ठाभ्यां नमः, कृष्णवर्णाय तर्जनीभ्यां नमः, सूर्यपुत्राय मध्यमाभ्यां नमः, मन्दगतये अनामिकाभ्यां नमः, गृध्रवाहनाय कनिष्ठिकाभ्यां नमः, पङ्गुपादाय करतल-करपृष्ठाभ्यां नमः, एवं हृदयादि न्यासः ॥

ध्यानम् ॥

दोर्भिर्धनुर्द्विशिखचर्मधरं त्रिशूलं
भास्वत्किरीटमुकुटोज्ज्वलितेन्द्रनीलम् ।
नीलातपत्रकुसुमादिसुगन्धभूषं देवं
भजे रविसुतं प्रणतोऽस्मि नित्यम् ॥

ॐ नमो भगवते शनैश्चराय मन्दगतये सूर्यपुत्राय महाकालाग्नि-
सदृशाय क्रूर (कृश) देहाय गृध्रासनाय नीलरूपाय चतुर्भुजाय
त्रिनेत्राय नीलाम्बरधराय नीलमालाविभूषिताय धनुराकारमण्डले
प्रतिष्ठिताय काश्यपगोत्रात्मजाय माणिक्यमुक्ताभरणाय छायापुत्राय
सकलमहारौद्राय सकलजगत्भयङ्कराय पङ्कुपादाय क्रूररूपाय
देवासुरभयङ्कराय सौरये कृष्णवर्णाय स्थूलरोमाय अधोमुखाय
नीलभद्रासनाय नीलवर्णरथारूडाय त्रिशूलधराय सर्वजनभयङ्कराय
मन्दाय दं, शं, नं, मं, हुं, रक्ष रक्ष, ममशत्रून्नाशय,
सर्वपीडा नाशय नाशय, विषमस्थशनैश्चरान् सुप्रीणय सुप्रीणय,
सर्वज्वरान् शमय शमय । समस्तव्याधीनामोचय मोचय विमोचय ।
मां रक्ष रक्ष, समस्त दुष्टग्रहान् भक्षय भक्ष्य, भ्रामय भ्रामय,
त्रासय त्र्रासय, बन्धय बन्धय, उन्मादयोन्मादय, दीपय दीपय,
तापय तापय, सर्वविघ्नान् छिन्धि छिन्धि,
डाकिनीशाकिनीभूतवेतालयक्षरक्षोगन्धर्वग्रहान् ग्रासय ग्रासय,
भक्षय भक्षय, दह दह, पच पच, हन हन, विदारय विदारय,
शत्रून् नाशय नाशय, सर्वपीडा नाशय नाशय,
विषमस्थशनैश्चरान् सुप्रीणय सुप्रीणय । सर्वज्वरान् शमय शमय ।
समस्तव्याधीन् विमोचय विमोचय, ओं शं नं मं ह्रां फं हुं,
शनैश्चराय नीलाभ्रवर्णाय नीलमेखलय सौरये नमः ॥

# ॥ शनिवज्रपंजरकवचम् ॥

श्री गणेशाय नमः ॥

नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।

चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्याद् वरदः प्रशान्तः ॥ १

ब्रह्मा उवाच ॥

शृणुध्वमृषयः सर्वे शनिपीडाहरं महत् ।

कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥ २ ॥

कवचं देवतावासं वज्रपंजरसंज्ञकम् ।

शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥ ३ ॥

ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनन्दनः ।

नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः ॥ ४ ॥

नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।

स्निग्धकण्ठश्च मे कण्ठं भुजौ पातु महाभुजः ॥ ५ ॥

स्कन्धौ पातु शनिश्चैव करौ पातु-शुभप्रदः ।

वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्तथा ॥ ६ ॥

नाभिं ग्रहपतिः पातु मन्दः पातु कटिं तथा ।

ऊरू ममान्तकः पातु यमो जानुयुगं तथा ॥ ७ ॥

पदौ मन्दगतिः पातु सर्वांगं पातु पिप्पलः ।

अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥ ८ ॥

इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः ।
न तस्य जायते पीडा प्रीतो भवति सूर्यजः ॥ ९ ॥
व्यय-जन्म-द्वितीयस्थो मृत्युस्थानगतोऽपि वा ।
कलत्रस्थो गतो वाऽपि सुप्रीतस्तु सदा शनिः ॥ १० ॥
अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे ।
कवचं पठते नित्यं न पीडा जायते क्वचित् ॥ ११ ॥
इत्येतत्कवचं दिव्यं सौरेर्यन्निर्मितं पुरा ।
द्वादशाऽष्टमजन्मस्थदोषान्नाशयते सदा ।
जन्मलग्नस्थितान् दोषान् सर्वान्नाशयते प्रभुः ॥ १२ ॥

॥ इति श्री ब्रह्माण्डपुराणे ब्रह्म-नारदसंवादे शनिवज्रपंजरकवचम् सम्पूर्णम् ॥

# ॥ शनैश्चरस्तोत्रम् ॥

श्रीगणेशाय नमः ॥
अस्य श्रीशनैश्चरस्तोत्रस्य । दशरथ ऋषिः । शनैश्चरो देवता ।
त्रिष्टुप् छन्दः ॥ शनैश्चरप्रीत्यर्थ जपे विनियोगः ।
दशरथ उवाच ॥
कोणोऽन्तको रौद्रयमोऽथ बभ्रुः कृष्णः शनिः पिंगलमन्दसौरिः ।
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय ॥ १ ॥
सुरासुराः किंपुरुषोरगेन्द्रा गन्धर्वविद्याधरपन्नगाश्च ।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥ २ ॥

नरा नरेन्द्राः पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृङ्गाः ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥ ३ ॥

देशाश्च दुर्गाणि वनानि यत्र सेनानिवेशाः पुरपत्तनानि ।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय ॥ ४ ॥

तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा ।
प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्रीरविनन्दनाय ॥ ५ ॥

प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायाम् ।
यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनन्दनाय ॥ ६

अन्यप्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात् ।
गृहाद् गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय ॥ ७

स्रष्टा स्वयंभूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी ।
एकस्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्रीरविनन्दनाय ॥ ८ ॥

शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबान्धवैश्च ।
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते ॥ ९ ॥

कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः ॥ १० ॥

एतानि दश नामानि प्रातरुत्थाय यः पठेत् ।
शनैश्चरकृता पीडा न कदाचिद्भविष्यति ॥ ११ ॥

॥ इति श्रीब्रह्माण्डपुराणे श्रीशनैश्चरस्तोत्रं संपूर्णम् ॥

# ॥ राहुकवचम् ॥

श्रीगणेशाय नमः ।

प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम् ।
सैंहिकेयं करालास्यं लोकानामभयप्रदम् ॥ १ ॥

नीलाम्बरः शिरः पातु ललाटं लोकवन्दितः ।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरिरवान् ॥ २ ॥

नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम ।
जिह्वां मे सिंहिकासूनुः कण्ठं मे कठिनाङ्घ्रिकः ॥ ३ ॥

भुजङ्गेशो भुजौ पातु नीलमाल्याम्बरः करौ ।
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥ ४ ॥

कटिं मे विकटः पातु ऊरू मे सुरपूजितः ।
स्वर्भानुर्जानुनी पातु जङ्घे मे पातु जाड्यहा ॥ ५ ॥

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।
सर्वाण्यङ्गानि मे पातु नीलचन्दनभूषणः ॥ ६ ॥

राहोरिदं कवचमृद्धिदवस्तुदं यो
भक्त्या पठत्यनुदिनं नियतः शुचिः सन् ।
प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्य
मात्मविजयं च हि तत्प्रसादात् ॥ ७ ॥

॥ इति श्रीमहाभारते धृतराष्ट्रसञ्जयसंवादे
द्रोणपर्वणि राहुकवचं सम्पूर्णम् ॥

# ॥ राहुस्तोत्रम् ॥

श्री गणेशाय नमः ।

राहुर्दानवमन्त्री च सिंहिकाचित्तवन्दनः ।
अर्धकायः सदाक्रोधी चन्द्रादित्यविमर्दनः ॥ १ ॥

रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः ।
ग्रहराजः सुधापायी राकातिथ्यभिलाषुकः ॥ २ ॥

कालदृष्टिः कालरूपः श्रीकण्ठहृदयाश्रयः ।
विधुन्तुदः सैंहिकेयो घोररूपो महाबलः ॥ ३ ॥

ग्रहपीडाकरो दंष्ट्री रक्तनेत्रो महोदरः ।
पञ्चविंशतिनामानि स्मृत्वा राहुं सदा नरः ॥ ४ ॥

यः पठेन्महती पीडा तस्य नश्यति केवलम् ।
आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा ॥ ५ ॥

ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम् ।
सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥ ६ ॥

॥ इति श्रीस्कन्दपुराणे राहुस्तोत्रं सम्पूर्णम् ॥

# ॥ केतुकवचम् ॥

श्रीगणेशाय नमः ।
केतुं करालवदनं चित्रवर्णं किरीटिनम् ।
प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥ १ ॥

चित्रवर्णः शिरः पातु भालं धूम्रसमद्युतिः ।
पातु नेत्रे पिङ्गलाक्षः श्रुती मे रक्तलोचनः ॥ २ ॥

घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः ।
पातु कण्ठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥ ३ ॥

हस्तौ पातु सुरश्रेष्ठः कुक्षिं पातु महाग्रहः ।
सिंहासनः कटिं पातु मध्यं पातु महासुरः ॥ ४ ॥

ऊरू पातु महाशीर्षो जानुनी मेऽतिकोपनः ।
पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिङ्गलः ॥ ५ ॥

य इदं कवचं दिव्यं सर्वरोगविनाशनम् ।
सर्वशत्रुविनाशं च धारणाद्विजयी भवेत् ॥ ६ ॥

॥ इति श्रीब्रह्माण्डपुराणे केतुकवचं सम्पूर्णम् ॥

# ॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

तत्सद् ब्रह्मार्पणमस्तु । यद्भद्रम् तन्म आसुव ॥

*Book Compiled By Shri N K Venkitaraman.*

[ For a free copy of printable PDF file write to nkv.nvr@gmail.com]